# कालभैरवं भजेऽहम्

## रागम्: भैरवम्    ताळम्: आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

कालभैरवं भजेऽहमनिशं काशीपुरवासं भूतेशम्

अनुपल्लवि

शूलचक्रपाशदण्डहस्तं शोकमोहवारणप्रशस्तम्

चरणम्

नारदादिनुतश्यामगात्रं नागयज्ञसूत्रविचित्रं
क्रूरतरपापदण्डनचतुरं गुरुगुहप्रियकरं दिगम्बरम्

मध्यमकाल साहित्यम्

वारिजासनास्यकृन्तनं वाञ्छितार्थफलदानचिन्तनं
धीरतरं विधिकपालधरणं देवराजसेविताब्जचरणम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇